ॐ ।। श्रीराम ।। ॐ

**श्री गुरुवंदना**

गुरुब्रहमा गुरुर्विष्णु गुरुर्देवो महेश्वरः
गुरुः साक्षातपर ब्रहम तस्मै श्री गुरुवे नमः

अखंडमंडलाकारं व्यापतं येन चराचरम्
तत्पदं दर्शितं येन तस्मै श्री गुरुवे नमः

ब्रहमानंदं परमसुखदं केवलं ज्ञानमूर्ति
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्

ऐकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्‌गुरुं तं नमामि

ॐ चैतन्यं शाश्वतं शान्तं व्योमातीतं निरंजनम्
नादविंदुकलातीतं तस्मै श्री गुरुवे नमः

गुरुमूर्ति स्मरेन्नितयं गुरुनाम सदा जपेत्
गुरोराज्ञां प्रकुर्वीत गुरोरन्यत्र भावयेत

गुकारस्त्वन्धकारश्च रुकारस्तेज उच्यते
अज्ञानग्रासकं ब्रहम गुरुरेव न संशयः

गुरोः पादोदकं पीतवा गुरोरुच्छिष्ट भोजनम्
गुरुमूर्तेः सदा ध्यानं गुरु मंत्रं सदा जपेत

नानाख्यामिदं सर्वं न केनापयस्ति भिन्नता
कार्यकारणता चैव तस्मै श्री गुरुवे नमः

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम्
मंत्रमूलं गुरोर्वाकय् मोक्षमूलं गुरोः कृपा

यस्व स्मरणमात्रेण ज्ञानमुत्पाद्यते स्वयम्
य ऐव सर्वसंप्राप्तिस्तस्मै श्री गुरुवे नमः

स्थावरं जंगमं चैव तथा चैव चराचरम्
व्यापतं येन जगतसर्वं तस्मै श्री गुरुवे नमः

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः
तत्त्वं ज्ञानात्परं नास्ति तस्मै श्री गुरुवे नमः

गुरोः कृपाप्रसादेन ब्रहमाविष्णुसदाशिवाः
समर्थाः प्रभवादौ च केवलं गुरुसेवया

।। जय श्रीराम ।।